# Parama Stutih

# પરમસ્તુતિઃ

## Document Information

Text title : Parama Stuti

File name : paramastutiH.itx

Category : vishhnu, vAdirAja, vishnu, stuti

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Malati Shekar, Revathy R.

Latest update : June 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 8, 2024

*sanskritdocuments.org*

Parama Stutih

# પરમસ્તુતિઃ

મૌક્તિકાઙ્કુરકલ્પદંષ્ટ્રમુખામ્બુજં પ્રલયામ્બુજં
ચક્રશઙ્ખવરાભયચ્છવિમત્કરં સુયશસ્કરમ્ ।
રત્નરાજિવિરાજિવૃત્તશિરોધરં ધરણીધરં
પોત્રિરૂપિણમચ્યુતં પ્રણતોઽસ્મિ તં સુખદસ્મિતમ્ ॥ ૧॥

અઙ્કહીનનિશેશબિમ્બસમાનનં નિજમાનનં
શઙ્ખમાલ્યસુબોધપુસ્તકધારિણં મધુવૈરિણમ્ ।
કુઙ્કુમાઙ્કિતચન્દનોજ્જવલકન્ધરં શ્રુતિમન્દિરં
કિઙ્કરીકૃતવિશ્વમશ્વમુખં ભજત્સુખદં ભજે ॥ ૨॥

નીલશૈલવિશાલવપ્રલસદ્ભુજાન્તરસદ્ભુજા-
બાલ્યમાનુષસક્તભૂલલનાશ્રમઘ્ન જિતશ્રમ્ ।
માલતીમણિમઞ્જુમાલ્ય સરોજનેત્ર ગુરો જને
કોલરૂપ ભવન્તમીશ નતોઽસ્મિ તં સુખદસ્મિતમ્ ॥ ૩॥

હારશોભિવિશાલવક્ષસમીશ્વરં તમનશ્વરં
વારિજાતસુજાતપત્રવિલોચનં કૃતસેચનમ્ ।
શારદામ્બુદસન્નિભં સકલોન્નતં સુજનૈર્નતમ્ ।
પારવર્જિતશૌર્યમશ્વમુખં ભજત્સુખદં ભજે ॥ ૪॥

જાતરૂપમયાગ્ર્યમધ્યવિભૂષણં ભવભીષણમ
પીતવસ્ત્રવિષક્તસદ્રશનોર્જિતં મલવર્જિતમ્ ।
આતતાયિસુરારિસઞ્ચયભઙ્ગદં કનકાઙ્ગદં
ખ્યાતસૂકરરૂપિણં પ્રણતોઽસ્મિ તં સુખદસ્મિતમ્ ॥ ૫॥

પદ્મરાગવિરાગકિઙ્કિણિમેખલાઞ્ચિતમેખલા
સાધ્ય બુદ્ધિરિયં વરોદરબન્ધન સ્મરતાં ધન ।
ત્વાદ્ય ચિન્તયદુદ્યદર્કસમામ્બરં ગતડમ્બરં
તદ્વરાય ભવન્તમશ્વમુખં ભજત્સુખદં ભજે ॥ ૬॥

મૃદ્વિભેન્દ્રકરોપમાઙ્ગવલ્લભં સુરવલ્લભં
સ્નિગ્ધજાનુયુગં મનોહરજઙ્ઘમુદ્ધૃતજઙ્ગમમ્ ।
પદ્મશોભિપદાનખીકૃતનાગમાન્યઘનાગમા-
વેદ્યમદ્ભુતસૂકરં પ્રણતોઽસ્મિ તં સુખદસ્મિતમ્ ॥ ૭॥

વર્તુલોરુયુગં મનોરમવૃત્તજાનુમવૃત્તજા
સ્તુત્યકોમલપુષ્ટજઙ્ઘમહીનતલ્પમહીનતમ્ ।
રક્તશારદચારુપદ્મલસત્પદં નિગમાસ્પદં
દૈત્યવાર્ધિમહૌર્વશ્વમુખં ભજત્સુખદં ભજે ॥ ૮॥

વાદિરાજયતીરિતા હયવક્ત્રભૂધરવક્ત્રભૂ
ર્વેદવાગિવ પાવની પરમસ્તુતિર્ગુણવિસ્તૃતિઃ ।
સાદરં પઠતાં સતાં હરિપાદપેશલપાદપે
સાધુભક્તિલતાં સ્થિરીકુરુતેતરામવૃતેતરા ॥ ૯॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતા
પરમસ્તુતિઃ સમ્પૂર્ણા ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Malati Shekar

*Parama Stutih*

pdf was typeset on June 8, 2024

Please send corrections to *sanskrit@cheerful.com*